# Natya Shastra Chapter 2

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨

## Document Information

Text title : naaTyashaastra adhyaaya 2

File name : natya02.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : May 24, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૨

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્

અથ ભારતીયે નાટ્યશાસ્ત્રે દ્વિતીયોऽધ્યાયઃ ।

ભરતસ્ય વચઃ શ્રુત્વા પપ્રચ્છુર્મુનયસ્તતઃ ।
ભગવન્ શ્રોતુમિચ્છામો યજનં રઙ્ગસંશ્રયમ્ ॥ ૧॥

અથ વા યા ક્રિયાસ્તત્ર લક્ષણં યચ્ચ પૂજનમ્ ।
ભવિષ્યદ્ભિર્નરૈઃ કાર્યં કથં તન્નાટ્યવેશ્મનિ ॥ ૨॥

ઇહાદિર્નાટ્યયોગસ્ય નાટ્યમણ્ડપ એવ હિ ।
તસ્માત્તસ્યૈવ તાવત્ત્વં લક્ષણં વક્તુમર્હસિ ॥ ૩॥

તેષાં તુ વચનં શ્રુત્વા મુનીનાં ભરતોऽબ્રવીત્ ।
લક્ષણં પૂજનં ચૈવ શ્રૂયતાં નાટ્યવેશ્મનઃ ॥ ૪॥

દિવ્યાનાં માનસી સૃષ્ટિર્ગૃહેષૂપવનેષુ ચ ।
(યથા ભાવાભિનિર્વર્ત્યાઃ સર્વે ભાવાસ્તુ માનુષાઃ ॥)
નરાણાં યત્નતઃ કાર્યા લક્ષણાભિહિતા ક્રિયા ॥ ૫॥

શ્રૂયતાં તદ્યથા યત્ર કર્તવ્યો નાટ્યમણ્ડપઃ ।
તસ્ય વાસ્તુ ચ પૂજા ચ યથા યોજ્યા પ્રયત્નતઃ ॥ ૬॥

ઇહ પ્રેક્ષ્યાગૃહં દૃષ્ટ્વા ધીમતા વિશ્વકર્મણા ।
ત્રિવિધઃ સન્નિવેશશ્ચ શાસ્ત્રતઃ પરિકલ્પિતઃ ॥ ૭॥

વિકૃષ્ટશ્ચતુરશ્રશ્ચ ત્ર્યશ્રશ્ચૈવ તુ મણ્ડપઃ ।
તેષાં ત્રીણિ પ્રમાણાનિ જ્યેષ્ઠં મધ્યં તથાऽવરમ્ ॥ ૮॥

પ્રમાણમેષાં નિર્દિષ્ટં હસ્તદણ્ડસમાશ્રયમ્ ।
શતં ચાષ્ટૌ ચતુઃષષ્ટિર્હસ્તા દ્વાત્રિંશદેવ ચ ॥ ૯॥

અષ્ટાધિકં શતં જ્યેષ્ઠં ચતુઃષષ્ટિસ્તુ મધ્યમમ્ ।
કનીયસ્તુ તથા વેશ્મ હસ્તા દ્વાત્રિંશદિષ્યતે ॥ ૧૦॥

દેવાનાં તુ ભવેજ્જ્યેષ્ઠં નૃપાણાં મધ્યમં ભવેત્ ।
શેષાણાં પ્રકૃતીનાં તુ કનીયઃ સંવિધીયતે ॥ ૧૧॥

(પ્રેક્ષાગૃહાણાં સર્વેષાં પ્રશસ્તં મધ્યમં સ્મૃતમ્ ।
તત્ર પાઠ્યં ચ ગેયં ચ સુખશ્રાવ્યતરં ભવેત્ ॥

પ્રેક્ષાગૃહાણાં સર્વેષાં ત્રિપ્રકારો વિધિઃ સ્મૃતઃ ।
વિકૃષ્ટશ્ચતુરસ્રશ્ચ ત્ર્યસ્રશ્ચૈવ પ્રયોક્તૃભિઃ ॥

કનીયસ્તુ સ્મૃતં ત્ર્યસ્રં ચતુરસ્રં તુ મધ્યમમ્ ।
જ્યેષ્ઠં વિકૃષ્ટં વિજ્ઞેયં નાટ્યવેદપ્રયોક્તૃભિઃ ॥)
પ્રમાણં યચ્ચ નિર્દિષ્ટં લક્ષણં વિશ્વકર્મણા ।
પ્રેક્ષાગૃહાણાં સર્વેષાં તચ્ચૈવ હિ નિબોધત ॥ ૧૨॥

અણૂ રજશ્ચ વાલશ્ચ લિક્ષા યૂકા યવસ્તથા ।
અઙ્ગુલં ચ તથા હસ્તો દણ્ડશ્ચૈવ પ્રકીર્તિતઃ ॥ ૧૩॥

અણવોઽષ્ટૌ રજઃ પ્રોક્તં તાન્યષ્ટૌ વાલ ઉચ્યતે ।
વાલાસ્ત્વષ્ટૌ ભવેલ્લિક્ષા યૂકા લિક્ષાષ્ટકં ભવેત્ ॥ ૧૪॥

યૂકાસ્ત્વષ્ટૌ યવો જ્ઞેયો યવાસ્ત્વષ્ટૌ તથાઙ્ગુલમ્ ।
અઙ્ગુલાનિ તથા હસ્તશ્ચતુર્વિંશતિરુચ્યતે ॥ ૧૫॥

ચતુર્હસ્તો ભવેદ્દણ્ડો નિર્દિષ્ટસ્તુ પ્રમાણતઃ ।
અનેનૈવ પ્રમાણેન વક્ષ્યામ્યેષાં વિનિર્ણયમ્ ॥ ૧૬॥

ચતુઃષષ્ટિકરાન્કુર્યાદ્દીર્ઘત્વેન તુ મણ્ડપમ્ ।
દ્વાત્રિંશતં ચ વિસ્તારન્મર્ત્યાનાં યો ભવેદિહ ॥ ૧૭॥

અત ઊર્ધ્વં ન કર્તવ્યઃ કર્તૃભિર્નાટ્યમણ્ડપઃ ।
યસ્માદવ્યક્તભાવં હિ તત્ર નાટ્યં વ્રજેદિતિ ॥ ૧૮॥

મણ્ડપે વિપ્રકૃષ્ટે તુ પાઠ્યમુચ્ચારિતસ્વરમ્ ।
અનિસ્સરણધર્મત્વાદ્વિસ્વરત્વં ભૃશં વ્રજેત્ ॥ ૧૯॥

યશ્ચાપ્યાસ્યગતો ભાવો નાનાદૃષ્ટિસમન્વિતઃ

સ વેશ્મનઃ પ્રકૃષ્ટત્વાદ્ વ્રજેદવ્યક્તતાં પરામ્ ॥ ૨૦॥

પ્રેક્ષાગૃહાણાં સર્વેષાં તસ્માન્મધ્યમમિષ્યતે ।
યાવત્પાઠ્યં ચ ગેયં ચ તત્ર શ્રવ્યતરં ભવેત્ ॥ ૨૧॥

[પ્રેક્ષાગૃહાણાં સર્વેષાં ત્રિપ્રકારો વિધિઃ સ્મૃતઃ ।
વિકૃષ્ટશ્ચતુરસ્રશ્ચ ત્ર્યસ્રશ્ચૈવ પ્રયોક્તૃભિઃ ॥)
કનીયસ્તુ સ્મૃતં ત્ર્યસ્રં ચતુરસ્રં તુ મધ્યમમ્ ।
જ્યેષ્ઠં વિકૃષ્ટં વિજ્ઞેયં નાટ્યવેદપ્રયોક્તૃભિઃ ]॥

દેવાનાં માનસી સૃષ્ટિર્ગૃહેષૂપવનેષુ ચ ।
યત્નભાવાભિનિષ્પન્નાઃ સર્વે ભાવા હિ માનુષા ॥ ૨૨॥

તસ્માદ્દેવકૃતૈર્ભાવૈર્ન વિસ્પર્ધેત માનુષઃ ।
માનુષસ્ય તુ ગેહસ્ય સમ્પ્રવક્ષ્યામિ લક્ષણમ્ ॥ ૨૩॥

ભૂમેર્વિભાગં પૂર્વં તુ પરીક્ષેત પ્રયોજક ।
તતો વાસ્તુ પ્રમાણેન પ્રારભેત શુભેચ્છયા ॥ ૨૪॥

સમા સ્થિરા તુ કઠિના કૃષ્ણા ગૌરી ચ યા ભવેત્ ।
ભૂમિસ્તત્રૈવ કર્તવ્યઃ કર્તૃભિર્નાટ્યમણ્ડપઃ ॥ ૨૫॥

પ્રથમં શોધનં કૃત્વા લાઙ્ગલેન સમુત્કૃષેત્ ।
અસ્થિકીલકપાલાનિ તૃણગુલ્માંશ્ચ શોધયેત્ ॥ ૨૬॥

શોધયિત્વા વસુમતીં પ્રમાણં નિર્દિશેત્તતઃ ।
(ત્રીણ્યુત્તરાણિ સૌમ્યં ચ વિશાખાપિ ચ રેવતી ।,
હસ્તિતિષ્યાનુરાધાશ્ચ પ્રશસ્તા નાટ્યકર્મણિ ।)
પુષ્યનક્ષત્રયોગેન શુક્લં સૂત્રં પ્રસારયેત્ ॥ ૨૭॥

કાર્પાસં બાલ્બજં વાપિ મૌઞ્જં વાલ્કલમેવ ચ ।
સૂત્રં બુધૈસ્તુ કર્તવ્યં યસ્ય ચ્છેદો ન વિદ્યતે ॥ ૨૮॥

અર્ધચ્છિન્ને ભવેત્સૂત્રે સ્વામિનો મરણં ધ્રુવમ્ ।
ત્રિભાગચ્છિન્નયા રજ્વા રાષ્ટ્રકોપો વિધીયતે ॥ ૨૯॥

છિન્નાયાં તુ ચતુર્ભાગે પ્રયોક્તુર્નાશ ઉચ્યતે ।
હસ્તાત્પ્રભ્રષ્ટયા વાપિ કશ્ચિત્વપચયો ભવેત્ ॥ ૩૦॥

તસ્માન્નિત્યં પ્રયત્નેન રજ્જુગ્રહણમિષ્યતે ।

કાર્યં ચૈવ પ્રયત્નેન માનં નાટ્યગૃહસ્ય તુ ॥ ૩૧॥

મુહૂર્તેનાનુકૂલેન તિથ્યા સુકરણેન ચ ।
બ્રાહ્મણાંસ્તર્પયિત્વા તુ પુણ્યાહં વાચયેત્તતઃ ॥ ૩૨॥

શાન્તિતોયં તતો દત્ત્વા તતઃ સૂત્રં પ્રસારયેત્ ।
ચતુષ્ષષ્ટિકરાન્કૃત્વા દ્વિધા કુર્યાત્પુનશ્ચ તાન્ ॥ ૩૩॥

પૃષ્ઠતો યો ભવેદ્ભાગો દ્વિધાભૂતસ્ય તસ્ય તુ ।
સમમર્ધવિભાગેન રઙ્ગશીર્ષં પ્રકલ્પયેત્ ॥ ૩૪॥

પશ્ચિમે ચ વિભાગેઽથ નેપથ્યગૃહમાદિશેત્ ।
વિભજ્ય ભાગાન્વિધિવદ્યથાવદનુપૂર્વશઃ ॥ ૩૫॥

શુભે નક્ષત્રયોગે ચ મણ્ડપસ્ય નિવેશનમ્ ।
શઙ્ખદુન્દુભિનિર્ઘોષૈર્મૃદઙ્ગપણવાદિભિઃ ॥ ૩૬॥

સર્વાતોદ્યૈઃ પ્રણુદિતૈઃ સ્થાપનં કાર્યમેવ તુ ।
ઉત્સાર્યાણિ ત્વનિષ્ટાનિ પાષણ્ડ્યાશ્રમિણસ્તથા ॥ ૩૭॥

કાષાયવસનાશ્ચૈવ વિકલાશ્ચૈઅવ યે નરાઃ ।
નિશાયાં ચ બલિઃ કાર્યા નાનાભોજનસંયુતઃ ॥ ૩૮॥

ગન્ધપુષ્પફલોપેતા દિશો દશ સમાશ્રિતઃ ।
પૂર્વેણ શુક્લાન્નયુતો નીલાન્નો દક્ષિણેન ચ ॥ ૩૯॥

પશ્ચિમેન બલિઃ પીતો રક્તશ્ચૈવોત્તરેણ તુ ।
યાદૃશં દિશિ યસ્યાં તુ દૈવતં પરિકલ્પિતમ્ ॥ ૪૦॥

તાદૃશસ્તત્ર દાતવ્યો બલિર્મન્ત્રપુરસ્કૃતઃ ।
સ્થાપને બ્રાહ્મણેભ્યશ્ચ દાતવ્યં ઘૃતપાયસમ્ ॥ ૪૧॥

મધુપર્કસ્તથા રાજ્ઞે કર્તૃભ્યશ્ચ ગુડૌદનમ્ ।
નક્ષત્રેણ તુ કર્તવ્યં મૂલેન સ્થાપનં બુધૈઃ ॥ ૪૨॥

મુહૂર્તેનાનુકૂલેન તિથ્યા સુકરણેન ચ ।
એવં તુ સ્થાપનં કૃત્વા ભિત્તિકર્મ પ્રયોજયેત્ ॥ ૪૩॥

ભિત્તિકર્મણિ નિર્વૃત્તે સ્તમ્ભાનાં સ્થાપનં તતઃ ।
તિથિનક્ષત્રયોગેન શુભેન કરણેન ચ ॥ ૪૪॥

સ્તમ્ભાનાં સ્થાપનં કાર્યં રોહિણ્યા શ્રવણેન વા ।
આચાર્યેણ સુયુક્તેન ત્રિરાત્રોપોષિતેન ચ ॥ ૪૫॥

સ્તમ્ભાનાં સ્થાપનં કાર્યં પ્રાપ્તે સૂર્યોદયે શુભે ।
પ્રથમે બ્રાહ્મણસ્તમ્ભે સર્પિસ્સર્ષપસંસ્કૃતઃ ॥ ૪૬॥

સર્વશુક્લો વિધિઃ કાર્યો દદ્યાત્પાયસમેવ ચ ।
તતશ્ચ ક્ષત્રિયસ્તમ્ભે વસ્ત્રમાલ્યાનુલેપનમ્ ॥ ૪૭॥

સર્વ રક્તં પ્રદાતવ્યં દ્વિજેભ્યશ્ચ ગુડૌદનમ્ ।
વૈશ્યસ્તમ્ભે વિધિઃ કાર્યો દિગ્ભાગે પશ્ચિમોત્તરે ॥ ૪૮॥

સર્વં પીતં પ્રદાતવ્યં દ્વિજેભ્યશ્ચ ઘૃતૌદનમ્ ।
શૂદ્રસ્તમ્ભે વિધિઃ કાર્યઃ સમ્યક્પૂર્વોત્તરાશ્રયે ॥ ૪૯॥

નીલપ્રાયં પ્રયત્નેન કૃસરં ચ દ્વિજાશનમ્ ।
પૂર્વોક્તબ્રાહ્મણસ્તમ્ભે શુક્લમાલ્યાનુલેપને ॥ ૫૦॥

નિક્ષિપેત્કનકં મૂલે કર્ણાભરણસંશ્રયમ્ ।
તામ્રં ચાધઃ પ્રદાતવ્યં સ્તમ્ભે ક્ષત્રિયસંજ્ઞકે ॥ ૫૧॥

વૈશ્યસ્તમ્ભસ્ય મૂલે તુ રજતં સમ્પ્રદાપયેત્ ।
શૂદ્રસ્તમ્ભસ્ય મૂલે તુ દદ્યાદાયસમેવ ચ ॥ ૫૨॥

સર્વેષ્વેવ તુ નિક્ષેપ્યં સ્તમ્ભમૂલેષુ કાઞ્ચનમ્ ।
સ્વસ્તિપુણ્યાહઘોષેણ જયશબ્દેન ચૈવ હિ ॥ ૫૩॥

સ્તમ્ભાનાં સ્થાપનં કાર્યં પુષ્પમાલાપુરસ્કૃતમ્ ।
રત્નદાનૈઃ સગોદાનૈર્વસ્ત્રદાનૈરનલ્પકૈઃ ॥ ૫૪॥

બ્રાહ્મણાંસ્તર્પયિત્વા તુ સ્તમ્ભાનુત્થાપયેત્તતઃ ।
અચલં ચાપ્યકમ્પઞ્ચ તથૈવાવલિતં પુનઃ ॥ ૫૫॥

સ્તમ્ભસ્યોત્થાપને સમ્યગ્દોષા હ્યેતે પ્રકીર્તિતાઃ ।
અવૃષ્ટિરુક્તા ચલને વલને મૃત્યુતો ભયમ્ ॥ ૫૬॥

કમ્પને પરચક્રાત્તુ ભયં ભવતિ દારુણમ્ ।
દોષૈરેતૈર્વિહીનં તુ સ્તમ્ભમુત્થાપયેચ્છિવમ્ ॥ ૫૭॥

પવિત્રે બ્રાહ્મણસ્તમ્ભે દાતવ્યા દક્ષિણા ચ ગૌઃ ।
શેષાણાં ભોજનં કાર્યં સ્થાપને કર્તૃસંશ્રયમ્ ॥ ૫૮॥

મન્ત્રપૂતં ચ તદ્દેયં નાટ્યાચાર્યેણ ધીમતા ।
પુરોહિતં નૃપં ચૈવ ભોજયેન્મધુપાયસૈઃ ॥ ૫૯॥

કર્તૄનાપિ તથા સર્વાન્કૃસરં લવણોત્તરામ્ ।
સર્વમેવં વિધિં કૃત્વા સર્વાતોદ્યૈઃ પ્રવાદિતૈઃ ॥ ૬૦॥

અભિમન્ત્ર્ય યથાન્યાયં સ્તમ્ભાનુત્થાપયેચ્છુચિઃ ।
'યથાઽચલો ગિરિર્મેરુર્હિમવાંશ્ચ મહાબલઃ ॥ ૬૧॥

જયાવહો નરેન્દ્રસ્ય તથા ત્વમચલો ભવ ।'
સ્તમ્ભદ્વારં ચ ભિત્તિં ચ નેપથ્યગૃહમેવ ચ ॥ ૬૨॥

એવમુત્થાપયેતજ્જ્ઞો વિધિદૃષ્ટેન કર્મણા ।
રઙ્ગપીઠસ્ય પાર્શ્વે તુ કર્તવ્યા મત્તવારણી ॥ ૬૩॥

ચતુસ્તમ્ભસમાયુક્તા રઙ્ગપીઠપ્રમાણતઃ ।
અધ્યર્ધહસ્તોત્સેધેન કર્તવ્યા મત્તવારણી ॥ ૬૪॥

ઉત્સેધેન તયોસ્તુલ્યં કર્તવ્યં રઙ્ગમણ્ડપમ્ ।
તસ્યાં માલ્યં ચ ધૂપં ચ ગન્ધં વસ્ત્રં તથૈવ ચ ॥ ૬૫॥

નાનાવર્ણાનિ દેયાનિ તથા ભૂતપ્રિયો બલિઃ ।
આયસં તત્ર દાતવ્યં સ્તમ્ભાનાં કુશૈલૈરધઃ ॥ ૬૬॥

ભોજને કૃસરાશ્ચૈવ દાતવ્યં બ્રાહ્મણાશનમ્ ।
એવં વિધિપુરસ્કારૈઃ કર્તવ્યા મત્તવારણી ॥ ૬૭॥

રઙ્ગપીઠં તતઃ કાર્યં વિધિદૃષ્ટેણ કર્મણા ।
રઙ્ગશીર્ષસ્તુ કર્તવ્યં ષડ્દારુકસમન્વિતમ્ ॥ ૬૮॥

કાર્યં દ્વારદ્વયં ચાત્ર નેપથ્યગૃહકસ્ય તુ ।
પૂરણે મૃત્તિકા ચાત્ર કૃષ્ણા દેયા પ્રયત્નતઃ ॥ ૬૯॥

લાઙ્ગલેન સમુત્કૃષ્ય નિર્લોષ્ટતૃણશર્કરમ્ ।
લાઙ્ગલે શુદ્ધવર્ણૌ તુ ધુર્યૌ યોજ્યૌ પ્રયત્નતઃ ॥ ૭૦॥

કર્તારઃ પુરુષશ્ચાત્ર યેઽઙ્ગદોષવિવિર્જિતાઃ ।
અહીનાઙ્ગૈશ્ચ વોઢવ્યા મૃત્તિકા પિટકૈર્નવૈઃ ॥ ૭૧॥

એવંવિધૈઃ પ્રકર્તવ્યં રઙ્ગશીર્ષં પ્રયત્નતઃ ।

કૂર્મપૃષ્ઠં ન કર્તવ્યં મત્સ્યપૃષ્ઠં તથૈવ ચ ॥ ૭૨॥

શુદ્ધાદર્શતલાકારં રઙ્ગશીર્ષં પ્રશસ્યતે ।
રત્નાનિ ચાત્ર દેયાનિ પૂર્વે વજ્રં વિચક્ષણૈઃ ॥ ૭૩॥

વૈડૂર્યં દક્ષિણે પાર્શ્વે સ્ફટિકં પશ્ચિમે તથા ।
પ્રવાલમુત્તરે ચૈવ મધ્યે તુ કનકં ભવેત્ ॥ ૭૪॥

એવં રઙ્ગશિરઃ કૃત્વા દારુકર્મ પ્રયોજયેત્ ।
ઊહપ્રત્યૂહસંયુક્તઃ નાનાશિલ્પપ્રયોજિતમ્ ॥ ૭૫॥

નાનાસઞ્જવનોપેતં બહુવ્યાલોપશોભિતમ્ ।
સસાલભઞ્જિકાભિશ્ચ સમન્તાત્સમલઙ્કૃતમ્ ॥ ૭૬॥

નિર્વ્યૂહકુહરોપેતં નાનાગ્રથિતવેદિકમ્ ।
નાનાવિન્યાસસંયુક્તં ચિત્રજાલગવાક્ષકમ્ ॥ ૭૭॥

સુપીઠધારિણીયુક્તં કપોતાલીસમાકુલમ્ ।
નાનાકુટ્ટિમવિન્યસ્તૈઃ સ્તમ્ભૈશ્ચાપ્યુપશોભિતમ્ ॥ ૭૮॥

એવં કાષ્ઠવિધિં કૃત્વા ભિત્તિકર્મ પ્રયોજયેત્ ।
સ્તમ્ભં વા નાગદન્તં વા વાતાયનમથાપિ વા ॥ ૭૯॥

કોણં વા સપ્રતિદ્વારં દ્વારવિદ્ધં ન કારયેત્ ।
કાર્યઃ શૈલગુહાકારો દ્વિભૂમિર્નાટ્યમણ્ડપઃ ॥ ૮૦॥

મન્દવાતાયનોપેતો નિર્વાતો ધીરશબ્દવાન્ ।
તસ્માન્નિવાતઃ કર્તવ્યઃ કર્તૃભિર્નાટ્યમણ્ડપઃ ॥ ૮૧॥

ગમ્ભીરસ્વરતા યેન કુતપસ્ય ભવિષ્યતિ ।
ભિત્તિકર્મવિધિં કૃત્વા ભિત્તિલેપં પ્રદાપયેત્ ॥ ૮૨॥

સુધાકર્મ બહિસ્તસ્ય વિધાતવ્યં પ્રયત્નતઃ ।
ભિત્તિષ્વથ વિલિપ્તાસુ  પરિમૃષ્ટાસુ સર્વતઃ ॥ ૮૩॥

સમાસુ જાતશોભાસુ ચિત્રકર્મ પ્રયોજયેત્ ।
ચિત્રકર્મણિ ચાલેખ્યાઃ પુરુષાઃ સ્ત્રીજનાસ્તથા ॥ ૮૪॥

લતાબન્ધાશ્ચ કર્તવ્યાશ્ચરિતં ચાત્મભોગજમ્ ।
એવં વિકૃષ્ટં કર્તવ્યં નાટ્યવેશ્મ પ્રયોક્તૃભિઃ ॥ ૮૫॥

પુનરેવ હિ વક્ષ્યામિ ચતુરશ્રસ્ય લક્ષણમ્ ।
સમન્તતશ્ચ કર્તવ્યા હસ્તા દ્વાત્રિંશદેવ તુ ॥ ૮૬॥

શુભભૂમિવિભાગસ્થો નાટ્યજ્ઞૈર્નાટ્યમણ્ડપઃ ।
યો વિધિઃ પૂર્વમુક્તસ્તુ લક્ષણં મઙ્ગલાનિ ચ ॥ ૮૭॥

વિકૃષ્ટે તાન્યશેષાણિ ચતુરશ્રેઽપિ કારયેત્ ।
ચતુરશ્રં સમં કૃત્વા સૂત્રેણ પ્રવિભજ્ય ચ ॥ ૮૮॥

બાહ્યતઃ સર્વતઃ કાર્યા ભિત્તિઃ શ્લિષ્ટેષ્ટકા દૃઢા ।
તત્રાભ્યન્તરતઃ કાર્યા રઙ્ગપીઠોપરિ સ્થિતાઃ ॥ ૮૯॥

દશ પ્રયોક્તૃભિઃ સ્તમ્ભાઃ શક્તા મણ્ડપધારણે ।
સ્તમ્ભાનાં બાહ્યતશ્ચાપિ સોપાનાકૃતિ પીઠકમ્ ॥ ૯૦॥

ઇષ્ટકાદારુભિઃ કાર્યં પ્રેક્ષકાણાં નિવેશનમ્ ।
હસ્તપ્રમાણૈરુત્સેધૈર્ભૂમિભાગસમુત્થિતૈઃ ॥ ૯૧॥

રઙ્ગપીઠાવલોક્યં તુ કુર્યાદાસનજં વિધિમ્ ।
ષડન્યાનન્તરે ચૈવ પુનઃ સ્તમ્ભાન્યથાદિશમ્ ॥ ૯૨॥

વિધિના સ્થાપયેતજ્ઞો દૃઢાન્મણ્ડપધારણે ।
અષ્ટૌ સ્તમ્ભાન્પુનશ્ચૈવ તેષામુપરિ કલ્પયેત્ ॥ ૯૩॥

સ્થાપ્યં ચૈવ તતઃ પીઠમષ્ટહસ્તપ્રમાણતઃ ।
વિદ્ધાસ્યમષ્ટહસ્તં ચ પીઠં તેષુ તતો ન્યસેત્ ॥ ૯૪॥

તત્ર સ્તમ્ભાઃ પ્રદાતવ્યાસ્તજ્જ્ઞૈર્મણ્ડપધારણે ।
ધારણીધારણાસ્તે ચ શાલસ્ત્રીભિરલઙ્કૃતાઃ ॥ ૯૫॥

નેપથ્યગૃહકં ચૈવ તતઃ કાર્યં પ્રયત્નતઃ ।
દ્વારં ચૈકં ભવેત્તત્ર રઙ્ગપીઠપ્રવેશનમ્ ॥ ૯૬॥

જનપ્રવેશનં ચાન્યદાભિમુખ્યેન કારયેત્ ।
રઙ્ગસ્યાભિમુખં કાર્યં દ્વિતીયં દ્વારમેવ તુ ॥ ૯૭॥

અષ્ટહસ્તં તુ કર્તવ્યં રઙ્ગપીઠં પ્રમાણતઃ ।
ચતુરશ્રં સમતલં વેદિકાસમલઙ્કૃતમ્ ॥ ૯૮॥

પૂર્વપ્રમાણનિર્દિષ્ટા કર્તવ્યા મત્તવારણી ।
ચતુઃસ્તમ્ભસમાયુક્તા વેદિકાયાસ્તુ પાર્શ્વતઃ ॥ ૯૯॥

સમુન્નતં સમં ચૈવ રઙ્ગશીર્ષં તુ કારયેત્ ।
વિકૃષ્ટે તૂન્નતં કાર્યં ચતુરશ્રે સમં તથા ॥ ૧૦૦॥

એવમેતેન વિધિના ચતુરશ્રં ગૃહં ભવેત્ ।
અતઃ પરં પ્રવક્ષ્યામિ ત્ર્યશ્રગેહસ્ય લક્ષણમ્ ॥ ૧૦૧॥

ત્ર્યશ્રં ત્રિકોણં કર્તવ્યં નાટ્યવેશ્મપ્રયોક્તૃભિઃ ।
મધ્યે ત્રિકોણમેવાસ્ય રઙ્ગપીઠં તુ કારયેત્ ॥ ૧૦૨॥

દ્વારં તૈનૈવ કોણેન કર્તવ્યં તસ્ય વેશ્મનઃ ।
દ્વિતીયં ચૈવ કર્તવ્યં રઙ્ગપીઠસ્ય પૃષ્ઠતઃ ॥ ૧૦૩॥

વિધિર્યશ્ચતુરશ્રસ્ય ભિત્તિસ્તમ્ભસમાશ્રયઃ ।
સ તુ સર્વઃ પ્રયોક્તવ્યસ્ત્ર્યશ્રસ્યાપિ પ્રયોક્તૃભિઃ ॥ ૧૦૪॥

એવમેતેન વિધિના કાર્યા નાટ્યગૃહા બુધૈઃ ।
પુનરેષાં પ્રવક્ષ્યામિ પૂજામેવં યથાવિધિઃ ॥ ૧૦૫॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે મણ્ડપવિધાનો નામ દ્વિતીયોઽધ્યાયઃ ॥

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 2*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*